# परिश्रमः ।

1. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
   नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति ।।

2. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीदैवेन देयमिति कापुरुषा वदन्ति ।
   दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोत्र दोषः।।

3. उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
   नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।

4. उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
   षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ।।

5. योजनानां सहस्त्रं तु शनैर्गच्छेत् पिपीलिका ।
   अगच्छन् वेनतेयो पि पदमेकं न गच्छति ।।

6. नात्युच्छशिखरो मेरुः नातिनिम्नं रसातलं ।
   व्यवसायद्वितीयानां नातिपारो महोदधिः ।।